# shrIsharavaNabhavamAnasapUjAstotram

# શ્રીશરવણભવમાનસપૂજાસ્તોત્રમ્

## Document Information

Text title : sharavaNabhavamAnasapUjAstotram

File name : sharavaNabhavamAnasapUjAstotram.itx

Category : pUjA, subrahmanya

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran, Aruna Narayanan

Latest update : December 17, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 3, 2020

*sanskritdocuments.org*

# શ્રીશરવણભવમાનસપૂજાસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।
ગુકારો હ્યાખ્યાતિ પ્રબલમનિવાર્યં કિલ તમો
 હકારો હાનિં ચ પ્રથયતિતરામેવ જગતિ ।
અતો મોહાન્ધત્વં શિથિલયતિ યન્નામ ગુહ ઇ-
 ત્યમું દેવં ધ્યાયામ્યભિલષિતસન્ધાનનિપુણમ્ ॥ ૧॥

સમાશ્લિષ્ટં વલ્લ્યા સમુપઘટિતં બાહુવિટપૈઃ
 સ્વમૂલાયાતાનાં સમુચિતફલપ્રાપણચણમ્ ।
સ્વસેવાનિષ્ઠાનાં સતતમપિ સૌખ્યોપગમકં
 સદા ધ્યાયામ્યેનં કમપિ તુ ગુહાખ્યં વિટપિનમ્ ॥ ૨॥

સુરાણાં સઙ્ઘાતૈસ્સમુપગતૈઃ સાન્દ્રકુતુકૈઃ
 સમારાધ્ય સ્વામિન્ ભજ વિહિતમાવાહનમિદમ્ ।
સમન્તાત્સદ્રત્નૈઃ સમુપહિતસોપાનસરણિ-
 સ્ફુરન્નાનાશોભં રચિતમપિ સિંહાસનમિદમ્ ॥ ૩॥

હૃતં ગઙ્ગાતુઙ્ગાદ્યખિલતટિનીભ્યોઽતિવિમલં
 સુતીર્થં પાદ્યાર્થં તવ નિહિતમઙ્ગીકુરુ વિભો ।
તથા પુણ્યૈસ્તીર્થૈર્વિહિતમિદમર્ઘ્યાચમનકં
 દયાર્દ્રાં દૃષ્ટિં મે દિશ દિશ દયાબ્ધે હરસુત ॥ ૪॥

સમન્તાત્સ્નાનીયૈઃ પરિમલગુણોત્કર્ષભરિતૈઃ
 સ્ફુરન્માણિક્યાદિપ્રતિખચિતસદ્રત્નફલકે ।
સમાસીનં હિ ત્વાં સુચિરમભિષઞ્ચન્નસુલભં
 પરાનન્દં યાસ્યામ્યનુપધિકૃપાબ્ધે હરસુત ॥ ૫॥

સુવાસોભિશ્ચાઙ્ગં તવ કિલ સમાચ્છાદ્ય સપદિ
 પ્રસાધ્યાંસે શુભ્રં વિમલમુપવીતં નવગુણમ્ ।
પ્રભૂતાંસ્તે ગન્ધાન્ ગિરિશસુત સન્ધાય નિટિલે

સુખાસીનં હિ ત્વાં નનુ ખલુ દિદૃક્ષે ચપલધીઃ ॥ ૬॥

કિરીટાનાં ષટ્કં તવ હિ કલયન્ ષણ્મુખ શિર-
સ્સ્વથ ગ્રીવાયાં તે સમનુઘટયન્ હારલતિકામ્ ।
લલાટેષ્વાતન્વન્ તિલકમથ તે કુણ્ડલગણં
સમર્ઘં શ્રોત્રેષુ ક્ષણમપિ દિદૃક્ષે ભવસુત ॥ ૭॥

અમન્દૈર્મન્દારદ્રુમકુસુમસઙ્ઘૈઃ સુરભિલૈઃ
સમર્ચન્ સામોદં તવ હિ સુકુમારાઙ્ગમખિલમ્ ।
સમન્તાત્સમ્પ્લાવાં તવ વદનસૌન્દર્યલહરીં
સદા સ્મારં સ્મારં સફલયિતુમીશે જનિમિમામ્ ॥ ૮॥

સમાજિઘ્ર સ્વામિન્નગરુયુતધૂપં કરુણયા
જિઘૃક્ષસ્વાપીમાનમલઘૃતદીપાનુપહૃતાન્ ।
ગૃહાણાજ્યપ્લાવાન્ મૃદુલતરભક્ષ્યાણિ વિવિધા-
ન્યુપાદત્સ્વાપ્યન્નં વિવિધમથ પઞ્ચામૃતમપિ ॥ ૯॥

સુકર્પૂરસ્વાદુક્રમુકયુતમેલાદિકલિતં
સુતામ્બૂલં સ્વામિન્ સદયમુપગૃહ્ણીષ્વ મૃદુલમ્ ।
તતસ્તે કર્પૂરૈસ્સુરભિતરનીરાજનવિધિં
પ્રકુર્વન્નાધાસ્યે તવ શિરસિ પુષ્પાઞ્જલિમપિ ॥ ૧૦॥

કરોમિ સ્વામિંસ્તે નિખિલમુપચારં પ્રવણધીઃ
દયાર્દ્રાસ્તે દૃષ્ટીર્વિકિર ગિરિજાનન્દન મયિ ।
સમન્તાત્સંસારવ્યસનકલુષીભૂતહૃદયં
પરિત્રાયસ્વાશાપરવશિતમાપન્નમપિ મામ્ ॥ ૧૧॥

ઇમાં ચેતઃ પૂજાં શરવણભુવો યઃ કિલ પઠેત્
સકૃદ્વાઽન્યૈર્ગીતં સપદિ શૃણુયાદ્ભક્તિભરિતઃ ।
ન તં સંસારાશા પરવશયતે નાપિ વિષયાઃ
ક્રમાત્પુણ્યાત્માઽયં નનુ ભજતિ કૈવલ્યપદવીમ્ ॥ ૧૨॥

ઇતિ શ્રીજગદ્ગુરુશૃઙ્ગેરીપીઠાધીશશ્રીચન્દ્રશેખરભારતી
શ્રીપાદૈઃકૃતં શ્રીશરવણભવમાનસપૂજાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran, Aruna Narayanan

*shrIsharavaNabhavamAnasapUjAstotram*

pdf was typeset on June 3, 2020

Please send corrections to *sanskrit@cheerful.com*